Roll No. ____________________ Sub. Code: 119

Please check that the questions paper contains ___ question and has ___ printed pages.

# D.A.V. INSTITUTIONS, CHHATTISGARH

## SAMPLE QUESTION PAPER 2023-24

## CLASS – X

## SUBJECT: SANSKRIT

**Time Allowed: 3 Hours** **Maximum Marks: 80**

सामान्यनिर्देशाः –

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 10 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति ।

| | | | | |
|---|---|---|---|---|
| ‘क’भागः | : | अपठितावबोधनम् | : | 10 अङ्काः |
| ‘ख’भाग: | : | रचनात्मक कार्यम् | : | 15 अङ्काः |
| ‘ग’भाग: | : | अनुप्रयुक्तव्याकरणम् | : | 25 अङ्काः |
| ‘घ’भागः | : | पठितावबोधनम् | : | 30 अङ्काः |

4. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
5. उत्तर लेखनात पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
6. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

‘क’ भागः

अपठितावबोधनम् (10 अङ्काः)

| | | |
|---|---|---|
| 1. | अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- | 10 |

जगति सर्वेषु सम्बन्धिषु मातुः पदम् अद्वितीयम् अस्ति। माता न केवलं जन्म ददाति अपितु व्यवहारस्य शिक्षाम् अपि यच्छति। बालकस्य चरित्र निर्माणे अपि तस्याः अभूतपूर्व- योगदानम्। ‘माता’ माननीया पूजनीया वा भवति। सा त्यागस्य मूर्तिः अपि भवति। अतः जगतः परिकल्पना अपि मातृरूपेण एव कृता। अथर्ववेद कथितम्– “माता भूमिः पुत्रोऽहं पृथिव्या:”। माता तु स्नेहस्य वात्सल्यस्य च सजीवा मूर्ति। वयं धेनुं “गोमाता” इति कथयामः स्वदेशाय च ‘मातृभूमिः’ इति वदामः। अतएव उपनिषत्सु अपि सर्वप्रथमम् उक्तम्- ‘मातृदेवो भव’ इति।

अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) — 1x2=2

I. जगतः परिकल्पना कस्मिन् रूपेण कृता?

II. स्वदेशाय किम् वदामः वयम्?

III. मातुः पदं कीदृशम् अस्ति?

आ. पूर्णवाक्येन लिखत- (केवलं प्रश्नद्यम् ) — 2x2=4

IV. मातुः अभूतपूर्वयोगदानं कुत्र ?

V. माता किं किं करोति?

VI. अथर्ववेदे मानवः कस्याः पुत्रः कथितः? — 1x3=3

इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)

1.‘तस्या:’ इति सर्वनाम पदं कस्मै प्रयुक्तम्?

(अ)मातृभूमये (ब) धेनवे

(स) मातुः कृते (द) अभूतपूर्व इति पदाय

2.‘मूर्तिः’ इति पदस्य किं विशेषणं गद्यांशे प्रयुक्तम्?

(अ) स्नेहस्य (ब) सजीवा

(स) वात्सल्यस्य (द) माता

3.‘कथयाम:’ इति क्रियायाः कर्तृपदं किम्?

(अ) गोमाता (ब) स्वदेशम्

(स) धेनुम् (द) वयम्

4. ‘कथ्यते’ इति अर्थे किं पदम् अनुच्छेदे प्रयुक्तम्?

(अ) अभीधीयते (ब) कथितम्

(स) कथयामः (द) वदामः — 1

ई. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।

‘ख’ भागः

रचनात्मकंकार्यम् (15 अङ्काः)

2\. भवान् विशालः प्रयागे पठति। स्व-अध्ययनस्य प्रगतिविषये ज्येष्ठं भ्रातरं प्रति लिखिते पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तशब्दैः पूरयित्वा पत्रं पुनः लिखत- $\frac{1}{2}$x10=5

परीक्षा भवनम्

(i)________________

तिथि:________________

पूज्य भ्रातः।

(ii)____________________

अत्र सर्वं कुशलम्। तत्रापि कुशलं कामये। अधुना (iii) ________________ शिक्षणं नियमेन आरब्धम्। अहं प्रतिदिनम् प्रातः (iv) ___________ उतिष्ठामि। ततः (v) _____________ पठितानां पाठानाम् (vi) ___________ करोमि। संस्कृतविषये (vii) ____________ प्रथमं स्थानं प्राप्तम्। गणितविषये मम दुर्बलता अधुना (viii) ________________।

पितृभ्याम् मम (ix) ___________________।

भवताम् अनुजः,

(x) ___________________।

मञ्जूषा

| |
|---|
| मया, सादरं नमः, पञ्चवादने, आवृत्तिं, प्रणामाः , प्रयागतः, मम, दूरीभूता, सप्तवादनपर्यन्तम्,विशालः |

3\. प्रदत्तं चित्रंदृष्टवामज्जूषायां प्रदत्तशब्दानां सहायता पञ्च वाक्यानि संस्कृतेन लिखत– 1x5=5



मज्जूषा

| | | |
|---|---|---|
| | मञ्चे, समाचारपत्राणि, पठनगृहम्, भ्राता, भगिनी, पुस्तकानि, आसन्दिका, पठतः, समयं, प्रदर्शयति, कपाटिका, सुसज्जितम्, घटिकायन्त्रम्, पुष्पगुच्छम्, पुष्पधान्याम्<br><br>**अथवा**<br>निम्नलिखितं विषयम् अधिकृत्य मञ्जूषा प्रदत्तशब्दानां सहाय्येन न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत-<br>“समाचारपत्राणां महत्त्वम्”<br><br>**मञ्जूषा**<br>समाजस्य , दर्पणः, प्रातः काले, शिक्षकः, सुलभम्, वर्तमानयुगस्य, साधनम्, समाजसुधारकः, धनोपार्जनम्, सम्पूर्णविश्वस्य, आलोचनाम्, उपलभ्यते, सामान्यजनानाम्, सर्वविधसामग्री, अधिकमूल्यम् न | 1x5=5 |
| 4 | अधोलिखितां कथां मञ्जूषायाः सहायतया पूरयित्वा पुनःलिखत।<br><br>मतङ्गमुनेः आश्रमे शबरी नाम (i) _________ आसीत्। सः (ii) _________ देहं व्यक्त्वा स्वर्गलोकं प्रति गगनसमये शबरीम् उक्तवान् आसीत् – “द्वादशवर्षाणाम् अनन्तरम् श्रीरामः अत्र आगमिष्यति। तस्य दर्शनात् भवत्याः अपि मोक्षप्राप्तिः भविष्यति” इति।<br>द्वादश वर्षानन्तरं श्रीरामः आगमिष्यति इति निश्चित्य शबरी (iii) ______ स्थितवती आसीत् । अन्ते श्रीरामः लक्ष्मणेन (iv) ______ दण्डकारण्यम् आगतवान्। तस्य आगमनस्य अपेक्षया सर्वं वनम् अलङ्कृतम् आसीत्।<br>श्रीरामस्य भोजनार्थं शबरी उत्तमानि विविधानि फलानि स्वीकृतवती। तत्र अन्यः विशेषः अपि आसीत्। यदा श्रीरामः एकं फलं खादितुम् उद्युक्तः, तदा शबरी तं निरुद्धवती। तत् फलं रामतः गृहीत्वा (v) ______ तस्य एकं भागं किञ्चित खादितवती। यदा फलं साधु इति सा (vi) ______ तदा एव तत् तस्मै दत्तवती। इत्थम् एकैकं फलम् अपि शबरी प्रथमं खादितवती। तदनन्तरम् एव श्रीरामः तत् फलं खादितवान्।<br>शबर्याः एतत् कार्यम् (vii) ______ इति भवन्तः मा चिन्तयन्तु । श्रीरामाय रसभूयिष्ठानि फलानि (viii) ______ एव सा तादृशं कार्यं कृतवती। श्रीरामः तत् असाधु इति न चिन्तितवान्। सन्तोषेण सर्वाणि फलानि खादितवान्। शबर्याः भक्तिः उत्तमा, (ix) ______ च आसीत्।<br>भवभूतिनामकः कविः “सतां केनापि कार्येण (x) ______ आराधनं व्रतम्” इति वदति। सज्जनाः कथमपि लोकस्य आराधनं सन्तोषं च कुर्वन्ति।<br><br>**मञ्जूषा**<br>श्रेष्ठा, आश्रमे, महामुनिः प्रथमतः, ज्ञातवती, नारी, सह, दातुम्, लोकस्य, असाधु | $\frac{1}{2}$x10=5 |

| | | |
|---|---|---|
| | | |
| | “ग” भाग:<br>अनुप्रयुक्तव्याकरणम् (25 अङ्काः) | |
| 5. | अधोलिखितवाक्येषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत – (केवल प्रश्नचतुष्टयम्)<br>1. सह नाववतु ।<br>2. वने + अस्मिन् अधिकाः गण्डकाः सन्ति ।<br>3. सप्तर्षयः पार्वतीं निकषा अगच्छन् ।<br>4. प्रति + एकम् अयनस्य अवधिः षण्मासाः।<br>5. कक्षायां शयनम् मा कुरु । | 1x4=4 |
| 6. | अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्टयम् )<br>1. सः अहोरात्रं परिश्रमं करोति ।<br>(अ) अहं च रात्रिः च तयोः समाहारः (ब) अहः च रात्रं च तयोः समाहारः<br>(स) अहः च रात्रिः च तयोः समाहारः (द) अहनि रात्रौ<br>2. अयम् पीतानि अम्बराणि यस्य सः आगच्छति।<br>(अ)पीताम्बराणि (ब) पीताम्बरम् (स) पीताम्बरः (द) पीताम्बरा:<br>3. अध्यापकः यथाशक्ति कार्यम् करोति ।<br>(अ) शक्तिम् अनतिक्रम्य (ब) शक्तिम् निष्क्रम्य<br>(स) शक्तिम् उल्लङ्घ्य (द) शक्तिम् आदाय<br>4. माता च पिता च वार्तालापं कुरुतः।<br>(अ) मातरौ (ब) पितरौ (स) मातृपितृ (द) मातरः<br>5. नीलकमलं विना सरः न शोभते ।<br>(अ) नीलं कमलम् (ब) नीलस्य कमलम्<br>(स) नीलं कमलं यस्य तत् (द) नीलाम् कमलाम् | 1x4=4 |
| 7. | अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति – प्रत्ययौ संयोज्य विभाज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवल प्रश्नचतुष्टयम्)<br>1. सप्ताह + ठक् अवकाशः रविवासरे भवति ।<br>(अ) साप्ताहिक्यः (ब) साप्ताहिकम् (स) साप्ताहिकी (द) साप्ताहिक:<br>2.बलवती हि आशा।<br>(अ) बल+वती (ब) गुण+ इनि (स) गुण+णिनि (द) गुणी + नः<br>3. प्रातः काले उद्यानस्य शोभा खलु दृश्+अनीयर् ।<br>(अ)दर्शनीयम् (ब)दर्शनीया (स) दर्शनीयः (द) दर्शनीयानि<br>4.मम अर्थिन: धनलाभमात्रेण सन्तोषं भजन्ते ।<br>(अ) अर्थी + नः (ब) अर्थ + इन् (स) अर्थ + मतुप् (द) अ + र्थिन:<br>5. धाव + शतृ बालकान् पश्य ।<br>(अ)धावमानम् (ब)धावमानान् (स)धावन्तः (द) धावत: | 1x4=4 |

| | | |
|---|---|---|
| | | |
| 8. | वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पुरयित्वा अधोलिखितं संवादं पुनः लिखत- (केवलं प्रश्नत्रयम्)<br>**रमेश:** किं छात्राः प्रार्थनां कुर्वन्ति?<br>**महेश:** आम् छात्रै: (i) ________ क्रियते ।<br>**रमेशः** किं सर्वे प्रार्थनासभायाम् अनुशासने तिष्ठन्ति ?<br>**महेशः** आम् सर्वै: अनुशासने (ii) ________ ।<br>**रमेशः** किं तत्र एका छाया गीतं गायति ।<br>**महेश:** आम् तत्र एकया (iii) ________ गीतं गीयते।<br>**रमेशः** किम् प्रधानाचार्येण अदि तत्र आगम्यते ?<br>**महेश:** आम् (iv) ________ अपि किंचित्कालानन्तरम् तत्र आगमिष्यति।<br>मज्जूषा<br>छात्रया, प्रधानाचार्य: , स्थीयते, प्रार्थना | 1x3=3 |
| 9. | अधः मैट्रोरेलयानस्य प्रस्थान समयसारिणी अङ्केषु लिखिताः। अङ्कानां स्थाने संस्कृतपदै: समयं लिखत- (केवलं प्रश्नत्रयम्)<br>1. मैट्रो रेल यानम् (9:00) ________ वादने शाहदरा मेट्रो स्थाने तिष्ठति ।<br>2. एतत् (10:15) ________ वादने काश्मीरी गेयस्थानम् आगच्छति ।<br>3. (10:30) ________ वादने तीसहजारी- स्थानम् आगच्छति।<br>4. एतत् (11:45) ________ वादने रिठाला रेलयान स्थानम् आगमिष्यति । | 1x3=3 |
| 10. | मज्जूषाया: प्रदत्तै: उचितै: अव्ययपदै: अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत – (केवलं प्रश्नचतुष्टयम्)<br>1. त्वम् असत्यं ________ वद।<br>2. उपवनात् ________ देवालयः अस्ति ।<br>3. ________ विद्यालये परीक्षा न भविष्यति ।<br>4. मम गृहे ________ विद्युत् न आसीत् ।<br>5. हे मित्र! अद्य त्वं ________ प्रसन्न: असि?<br>मञ्जूषा<br>यावत् , मा , किमर्थम् , बहिः , श्वः | 1x4=4 |
| 11. | अधोलिखितवाक्येषु रेखांकित- अशुद्धपदाय उचितपदं चित्वा वाक्याणि पुनः लिखत- (केवलं प्रश्नत्रयम्)<br>1. मुखे द्वात्रिंशत् <u>दन्तानि</u> भवन्ति ।<br>(अ) दन्ताः (ब) दन्तौ (स) दन्ताणी (द) दन्तानि<br>2. उद्याने सुन्दराणि मनोहराणि <u>पुष्पम</u> सन्ति ।<br>(अ) पुष्पा: (ब) पुष्पाणि (स) पुष्पेभ्यः (द) पुष्पानि | 1x3=3 |

<table>
<tr><td></td><td>3. तिस्रः <u>नारी</u> उद्याने भ्रमन्ति ।<br>(अ) नार्यौ (ब) नार्य: (स) नारि (द) नार्या<br>4. मम मातुः <u>नामः</u> श्रीमती श्यामा अस्ति ।<br>(अ) नामम् (ब) नाम् (स) नामन् (द) नाम</td><td></td></tr>
<tr><td></td><td>“घ”भागः<br>पठितावबोधनम् (30 अङ्काः)</td><td></td></tr>
<tr><td>12.</td><td>अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानां उत्तराणि संस्कृतेन लिखत-<br>कालोऽहम्। अहं खलु कालः। विश्वस्य आत्माऽहम्। कलयामि गणयामि जगतः आयुः प्रमाणम्। सततं चक्रवत् परिवर्तमानः भूतं वर्तमानं भविष्यदपि च वीक्षमाणः अहमेव साक्षी जगत: उत्पत्तेः विकासस्य प्रलयस्य च । इदम् जगत् तु पुनः पुनः जायते विलीयते च परमहं सर्वदा विद्यमानोऽस्य सर्वं क्रियाकलापं पश्यामि। अहो! किं जानीथ यूयम्, “कियती प्राचीना इयम् सृष्टि:!” नैव! तर्हि श्रृणुत ध्यानेन।<br>“कृतयुगं त्रेतायुगं द्वापरयुगं कलियुगञ्चेति चत्वारि युगानि। चतुर्णां युगानां समूहः एव महायुगम्। एकसप्ततिमहायुगानाम् एकम् मन्वन्तरम्। चतुर्दशमन्वन्तराणां समूहः कल्पः। एकः कल्पः एव ब्रह्मण: एकं दिनं मन्यते। ब्रह्मण: आयु: शतं वर्षाणि” ।</td><td>5</td></tr>
<tr><td></td><td>अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)<br>1. विश्वस्य आत्मा कः?<br>2. कालः कस्य आयुषः प्रमाणं गणयति?<br>3. आयु: कथम् वर्षाणि भवन्ति।</td><td>$\frac{1}{2}$x2=1</td></tr>
<tr><td></td><td>आ. पूर्णवाक्येन लिखत- (केवलं प्रश्नद्वयम्)<br>1. कालः कस्य साक्षी?<br>2. महायुगम् केषां युगानां समूहः सन्ति?<br>3. चत्वारि युगानि कानि सन्ति?</td><td>1x2=2</td></tr>
<tr><td></td><td>इ. निर्देशानुसारम् उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नद्वयम्)<br>1. “विद्यमानः” विशेषणपदं कस्य विशेष्यस्य कृते प्रयुक्तम्?<br>(अ) ‘सर्वं’ इति पदस्य (ब) ‘क्रियाकलापं’ इति पदस्य<br>(स) ‘अस्य’ इति पदस्य (द) ‘अहं’ इति पदस्य<br>2. ‘अनवरतं’ पदस्य कः पर्यायः अत्र प्रयुक्तः?<br>(अ) भूतं (ब) वर्तमानं (स) सततं (द) भविष्यम्<br>3. “जायते” पदस्य विपरीतार्थकरूपेण किं पदं प्रयुक्तम् ?<br>(अ) उत्पत्तेः (ब) विलीयते (स) विद्यमान: (द) विकासस्य</td><td>1x2=2</td></tr>
<tr><td>13.</td><td>अधोलिखितं पद्यांशं / श्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-<br>आचार: प्रथमो धर्मः इत्येतद् विदुषां वचः।<br>तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥</td><td>5</td></tr>
<tr><td></td><td>अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम् )<br>1. प्राणेभ्योऽपि कं रक्षेत्?<br>3. प्रथमः धर्मः कः अस्ति?</td><td>$\frac{1}{2}$x2=1</td></tr>
</table>

| | | |
|---|---|---|
| | 3. आचारः प्रथमो धर्मः इति केषां वचः?<br>आ. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्)<br>1. विदुषां वचः किम् अस्ति?<br>2. कं जीवने रक्षेत्?<br>3. सदाचारं केभ्यः रक्षेत्?<br><br>इ. निर्देशानुसारम् उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नद्वयम्)<br>१. 'धर्मः' पदस्य विशेषणं पदम् अत्र किम्?<br>(अ) आचार: (ब) सदाचारं (स) वचः (द्) प्रथमः<br>२. 'मूर्खाणाम्' इति पदस्य विलोमपदं किमस्ति?<br>(अ) वचः (ब) आचारः (स) विदुषाम् (द) सदाचारः<br>३. अस्मिन् श्लोके 'दुराचारम्' इत्यस्य पदस्य कः विपर्ययः प्रयुक्तः?<br>(अ) सदाचारम् (ब) आचारः (स) प्राणेभ्यः (द) धर्मः | 1x2=2<br><br><br><br><br>1x2=2 |
| 14. | अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -<br><br>भीम: - (युधिष्ठिरं प्रति) भ्रात:! द्रौणिम् अनुगन्तुं मह्यम्।<br>युधिष्ठिरः - गच्छ वत्स! विजयी भव। नकुलः तव सारथिः भवतु (भीमसेनः निर्गच्छति, श्रीकृष्णः अर्जुनेन सह प्रविशति)।<br>श्रीकृष्णः - भो धर्मराज! समीचीनं न कृतं भवता। पुत्रशोकविह्वल: भीमसेन: एकाकी एव द्रौणिं हन्तुम् अभिधावति।<br>युधिष्ठिर: - भगवन्! सः तु एकाकी एव द्रोणपुत्राय अलम्।<br>श्रीकृष्ण: - वत्स! न जानाति भवान् द्रोणपुत्रस्य चपलां प्रकृतिम्। पितु: द्रोणात् प्राप्तं ब्रम्हशिरो नाम अस्त्रं विद्यते तस्य पार्श्वे यदि तत् प्रयुज्यते सर्वा पृथ्वी दग्धा स्यात् ।<br><br>अ. एकपदेन उत्तरत (केवल प्रश्नद्वयम् )<br>1. क: एकाकी एव द्रोणपुत्राम् अलम् आसीत्?<br>2. श्रीकृष्णः युधिष्ठिरं कथं सम्बोधयति?<br>3. कस्य पुत्रस्य चपलां प्रकृतिम् आसीत्?<br>आ. पूर्णवाक्येन उत्तरत (केवल प्रश्नद्वयम्)<br>1. यदि ब्रह्मास्त्रं प्रयुज्यते तर्हि पृथिव्या: किं स्यात्?<br>2. कः तु एकाकी एव अलम् अस्ति?<br>3. नकुलस्य सारथिः कः आसीत्?<br>इ. निर्देशानुसारं शुद्धम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नद्वयम्)<br>1.'अभिधावति' इति क्रियापदस्य कर्तृपदं किम्?<br>(अ) श्रीकृष्णः (ब) भीमसेनः (स) एकाकी (द) द्रौणिम्<br>2. भवान् द्रौणे: चपलां प्रकृतिम् अत्र किं विशेष्यम्?<br>(अ) चपलाम् (ब) प्रकृतिम् (स) भवान् (द) द्रौणे:<br>3.जानाति भवान् द्रौणे: चपलां प्रकृतिम्। अत्र 'भवान्' इति सर्वनामपदं कस्मै प्रयुक्तम्? | $\frac{1}{2}$x2=1 |

| | | |
|---|---|---|
| | (अ) श्रीकृष्णाय (ब) भीमाय (स) नकुलाय (द) युधिष्ठिराय | |
| 15. | रेखांकित पदानि आधृत्य प्रश्ननिर्माणं कुरूत- (केवलं पञ्च प्रश्ना:)<br>1. अरुणस्य प्रदेशः <u>अरुणाचलः</u> ।<br>2. मिथुनः <u>विशिष्ट</u> राजपशु: ।<br>3. एतदर्थं <u>स्थलानां</u> दर्शनाय प्रबन्धोऽपि वर्तते ।<br>4. अरुणाचले अनेके <u>उत्सवाः</u> मान्यन्ते।<br>5. अरुणाचले पुष्पाणां सुगन्धिः <u>मनोहरः</u>।<br>6. अरुणाचलप्रदेशस्य <u>संस्कृतिः</u> विविधा मनोहरा च। | $\frac{1}{2}$x2=1 |
| 16 | मञ्जूषात: समुचितपदानि चित्वा अधोलिखित श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत-<br>यः इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।<br>न कुर्यादहितम् कर्म सः परेभ्यः कदापि च।।<br>अन्वय: - य: (I) _____________ श्रेयः प्रभूतानि (ii) _____________ च इच्छति। (iii) _____________ परेभ्यः अहितम् कर्म कदापि न (iv) _____________।<br>मञ्जूषा<br>कुर्यात् , आत्मनः, सुखानि, स:<br>अथवा<br>आचार्यात्पादमादत्ते पादं शिष्यः स्वमेधया।<br>कालेन पादमादत्ते पादं सब्रह्मचारिभि:॥<br>भावार्थ: - शिष्यस्य शिक्षा प्राप्तेः चत्वारि साधनानि सन्ति। सः शिक्षायाः चतुर्थांशं (i) _____________ प्राप्नोति, द्वितीयं चतुर्थांशं च (ii) _____________ लभते। एवमेव अन्यत् (iii) _____________ समयक्रमेण प्राप्नोति, शेषं चतुर्थांशम् च (iv) _____________ प्राप्नोति।<br>मञ्जूषा<br>स्वमेधया, सब्रह्मचारिभिः चत्वारि, आचार्यात् | $\frac{1}{2}$x4=2 |
| 17. | अधोलिखितवाक्येषु रेखाङ्किकतपदानां प्रसाङ्गानुकूलम् उचितार्थं चित्वा लिखत- (केवलं प्रश्नचतुष्टयम्)<br>(i) नि: सारलघुधनम्-<br>(अ) सारहीनम् धनम् (ब) चञ्चलम् धनम्<br>(स) तुच्छधनम् (द) तूच्छधनाम् | $\frac{1}{2}$x4=2 |

| | | |
|---|---|---|
| | (ii) कार्पण्यानिश्चितमति: -<br>(अ) कृपणतावशात् अनिश्चितबुद्धि: (ब) दरिद्रतावशात् दुर्बलबुद्धि:<br>(स) उदारताकारणात् अस्थिरप्रज्ञ: (द) उदासीनताकारणात् निश्चितबुद्धि:<br>(iii) मनुष्य: कदापि परुषां वाचम् न अभ्युदीरयेत् ।<br>(अ) कटु (ब) कठोराम्<br>(स) मधुरम् (द) मूकम्<br><br>(iv) सः विवेक: इति ईरित: ।<br>(अ) प्रेरित: (ब) कथितः<br>(स) पठितः (द) लिखितः<br>(v) व्यसनं प्राप्य यो मोहात् केवलम् परिदेवयेत् ।<br>(अ) परित: देवयेत् (ब) प्रसन्न: भवेत्<br>(स) विलापं कुर्यात् (द) प्राप्नुयात् | |
| 18. | अधोलिखित- कथां रिक्तस्थानानि पूरयित्वा पुनः लिखत -<br>दुष्टबुध्दि: तु तयो: वार्ताम् श्रुत्वा (i) __________ एव क्षेत्रं गतः। तत्र अश्वत्थमूलं खनित्वा तं सुवर्णकलशं प्राप्तवान्। यदा सः तस्य (ii) __________ अपसारयति तदैव भयङ्करम् एकं विषधरं (iii) __________ कुर्वन्तं पश्यति। भीत: स: कलशं पुनः आवृत्य तम् च (iv) __________ मित्रस्य गृहं समागतः। स्वमित्रं (v) __________ मारयितुम् इच्छन् स: भित्तौ सन्धिं प्रकल्प्य तन्मध्यतः (vi) _______ गृहाभ्यन्तरे क्षिप्तवान् ।<br><br>विचित्रा (vii) __________ दैवगतिः। पतितात् कलशाद् बहि: निर्गत्य विषधरः तमेव दुष्टबुद्धिं दष्टवान्। कलशपातशब्देन प्रबुद्धौ तौ दम्पती आश्चर्येण प्रचुरमणिमाणिक्यानाम् (viii) __________ भासमानं निजगृहं दृष्ट्वा परस्परम् अवलोक्यन्तौ अतिष्ठताम् ।<br>अतः उच्यते -<br>पापिनाञ्च सदा दु:खं, सुखं वै पुण्यकर्मणाम्।<br>एवं स्थिरतरं ज्ञात्वा, साधुवृत्तिं समाचरेत्॥<br><br>मञ्जूषा<br>फूत्कारं, आभया, सर्पेण ,झटिति ,<br>खलु, आदाय, कलशं, आवरणम् | $\frac{1}{2}$x8=4 |